# प्रथमः पाठः

वाणी-वन्दना-गीतिः इयम्। सरला सरसा च सरस्वती-वन्दना-गीतिरियम् कविपुंगवेन डॉ. हरिरामाचार्येण विरचिता वर्तते। १९६६ तमे ईस्वीये वर्षे रचिता, वसन्तबहार-रागेण उपनिबद्धा, 'मधुच्छन्दा' इत्याख्य-ग्रन्थे संकलिता लोके बहुश्रुता च इयं गीतिः वस्तुतः कवेः आद्या गीतिरचना आसीत् या हि बहुत्र प्रकाशिता, आकाशवाणी-दूरदर्शनाभ्यां च चिरं प्रसारिता प्रचारिता च।

## जय सुरभारति!

**जय जय हे भगवति सुरभारति! तव चरणौ प्रणमामः।**
**नाद-ब्रह्ममयि जय वागीश्वरि! शरणं ते गच्छामः ।।१।।**

**त्वमसि शरण्या त्रिभुवनधन्या,**
**सुर-मुनि-वन्दित-चरणा।**
**नवरस-मधुरा कविता-मुखरा,**
**स्मित-रुचि-रुचिराभरणा ।।२।।**

**आसीना भव मानस-हंसे**
**कुन्द-तुहिन-शशि-धवले!**
**हर जडतां कुरु बोधि-विकासं**
**सित-पङ्कज-तनु-विमले! ।।३।।**

**ललित-कलामयि ज्ञान-विभामयि**
**वीणा-पुस्तक-धारिणि!**
**मतिरास्तान्नो तव पद-कमले**
**अयि कुण्ठा-विष-हारिणि! ।।४।।**

**जय जय हे!**

## शब्दार्थाः

**भगवति**– हे देवि! 'भगवती' शब्दस्य सम्बोधने रूपम्। **सुरभारति**– हे शब्दस्य अधिष्ठात्रि देवि! 'सुरभारती' शब्दस्य सम्बोधने रूपम्। **नादब्रह्ममयि**– हे शब्दब्रह्मयुक्ते! 'नादब्रह्ममयी' इति शब्दस्य सम्बोधने रूपमिदम्। **वागीश्वरि**– हे वाग्देवि, हे वाचाम् ईश्वरि! (हे वाणी की स्वामिनी!) 'वागीश्वरी' इति शब्दस्य सम्बोधने रूपम् इदम्। **शरण्या**– शरणदात्री, आश्रयभूता, प्ररक्षिका। **त्रिभुवनधन्या**– त्रिलोके धन्या (श्रेष्ठा)। **सुरमुनिवन्दितचरणा**– सुरैः (देवैः) मुनिभिश्च वन्दितौ चरणौ यस्याः सा (बहुव्रीहिः समासः)। देवों और मुनियों द्वारा पूजित चरणों वाली। **नवरसमधुरा**– नवरसैः मधुरा (माधुर्यदायिनी, सुखदा)। शृङ्गारः, हास्यं करुणः, रौद्रः, वीरः, भयानकः, वीभत्सः, अद्भुतं, शान्तः च – एते नव (नौ) काव्यरसाः। **कविता-मुखरा**– कविता-द्वारा मुखरा (शब्दायमाना)। कविता से मुखरित। **स्मितरुचिरुचिराभरणा**– स्मितरुचिः मन्दहासयुक्ता छविः, तदेव रुचिरं सुन्दरम् आभरणम् आभूषणं यस्याः सा तादृशी। मन्द हँसीयुक्त छविरूपी आभूषण वाली। **आसीना भव**– उपविष्टा भव, बैठो, विराजो। **मानस-हंसे**– 'मानस' सरोवरस्थे हंसे, मम मनोरूपिणे हंसे वा। मानसरोवर के हंस पर अथवा मेरे मानस-रूपी हंस पर। **कुन्द-तुहिन-शशि-धवले**– हे कुन्द-हिम-चन्द्रवत् शुभ्रे! हे चमेली, बर्फ व चन्द्रमा के समान धौले वर्ण वाली! **जडताम्**– मन्दताम्, अज्ञानम्। **बोधि-विकासम्**– ज्ञानस्य विकासम्। **हर**– दूरीकुरु। **सितपंकजतनुविमले**– सितपंकजं श्वेतकमलम्, तद्वत्, तनु-विमला रम्या पवित्रा च या, तत्सम्बोधने। श्वेतकमल (पुण्डरीक) के समान सुन्दर व पवित्र हे सरस्वति! **ललितकलामयि**– हे ललित कलाभिः समन्विते। हे ललितकलाओं से युक्त! **ज्ञानविभामयि**– हे ज्ञान-कान्ति-युक्ते! **पद-कमले**– चरण-कमले। **मतिरास्तान्नो**– नः (अस्माकं) मतिः (बुद्धिः) आस्ताम् (उपविष्टा स्यात्)। हमारी बुद्धि रहे।

**टिप्पणी**– 'मतिरास्तान्नो तव पद-कमले' (मतिः+आस्ताम्+नः)– अत्र वस्तुतः व्याकरणदृशा '**मतिरास्तान्नस्तव**' इति सन्धिः स्यात्।

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठप्रश्नाः**

१. निम्नलिखितेषु पदेषु सम्बोधनपदं नास्ति —

(अ) भगवति (आ) सुरभारति

(इ) वागीश्वरि (ई) मानसहंसे ( )

२. अस्यां वन्दनायाम् आहत्य कति सम्बोधन-पदानि सन्ति —

(अ) सप्त (आ) अष्टौ

(इ) दश (ई) त्रीणि ( )

३. अस्यां गीत्यां कस्याः वन्दना विधीयते —

(अ) वाग्देव्याः (आ) दुर्गायाः

(इ) भारतमातुः (ई) ललितकलायाः ( )

४. 'वागीश्वरी' इत्यत्र सन्धिविच्छेदः अस्ति —

(अ) वाक्+ईश्वरी (आ) वाग+ईश्वरी

(इ) वागी+श्वरी (ई) वागी+इश्वरी ( )

**लघूत्तरात्मक-प्रश्नाः**

१. 'जय जय हे भगवति सुरभारति' इत्यस्याः गीतेः रचयिता कोऽस्ति ?

२. कति काव्यरसाः सन्ति ? केषाञ्चन त्रयाणां रसानां नामानि लिखन्तु।

३. 'मानस-हंसः' इत्यस्य किं अर्थद्वयं कर्तुं शक्यते ?

४. 'सितपङ्कजम्' इत्यस्य पर्यायशब्दत्रयं लिखन्तु।

**निबन्धात्मक-प्रश्नाः**

१. ''आसीना भव.....विमले।'' इति पद्यं हिन्दीभाषया अनूद्यताम्।

२. ''त्वमसि शरण्या.....रुचिराभरणा।'' इति पद्यं संस्कृतेन व्याख्यायताम्।

**प्रयोगात्मक-कार्यम्**

इयं वन्दना गीतिः You tube इत्यादि-स्थलेषु उपलभ्यते। ततः श्रुत्वा, अभ्यासं च कृत्वा विद्यालये यथावसरं प्रयोगः करणीयः।

## उत्तर-माला

**वस्तुनिष्ठ-प्रश्नाः**

१. (ई) २. (इ) ३. (अ) ४. (अ)